Shri Raghunath Temple MSS. Library,
JAMMU

No. ४४९५

Title शरभ सहस्रनाम स्तोत्रं

Author श्री हरिहर ब्रह्म

Extent ९ Age १८४८

Subject तन्त्रम्.

© Dharmartha Trust J&K. Digitized by eGangotri

पारमनामसहस्रम्

४४९५

4495

F. = 9

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri

॥ श्रीगणेशाय नमः ॥ ॐ अस्य श्रीशारभसहस्रनामस्तोत्रमहामंत्रस्य वामदेव ऋषिः। जगती
छंदः। कालाग्निरुद्रो देवता। अथवा। कालाग्निरुद्र ऋषिः। जगती छंदः। शारभसापक्षिराजो देवता।
खं बीजं। स्वाहा शक्तिः। फट् कीलकं। शारभेश्वरप्रीत्यर्थे जपे विनियोगः॥ ॐ खें खां खं फट् अंगु
ष्ठाभ्यां नमः। प्राणग्रहासि हुं फट् तर्जनीभ्यां॰। सर्वशत्रुसंहारणाय मध्यमाभ्यां॰। शारभ
साळुव पक्षिराजाय अनामिकाभ्यां॰। हुं फट् कनिष्ठिकाभ्यां॰। स्वाहा। करतलकरपृष्ठाभ्यां॰
एवं हृदयादि। ॐ भूर्भुवःस्वरोमिति दिग्बंधः॥ ध्यानं। चंद्रार्काग्नित्रिदृष्टिः कुलिशवरनख
श्चंचलात्युग्रजिह्वः कालीदुर्गा च पक्षौ हृदयजठरगो भैरवो वाडवाग्निः॥ ऊरुस्थो व्याधि
मृत्युः शारभवरखगश्चंडवातातिवेगः संहर्ता सर्वशत्रून्स जयति शारभः साळुवः पक्षि १
राजः॥१॥ ॐ सर्वदेवतात्मन् तस्य रहस्यामित तेजस॥ अष्टोत्तरसहस्रं तु नाम्नां सर्वस्य मे
शृणु॥२॥ यच्छ्रुत्वा मनुजव्याघ्र सर्वान्कामानवाप्स्यसि॥ स्थिरस्थाणुः प्रभुर्भीमः प्रभवो वर

© Dharmartha Trust J&K. Digitized by eGangotri

दोवरः।।सर्वात्मासर्वविख्यातःसर्वःसर्वकरोभवः।।१।।जटीचर्मीशिखंडीचसर्वांगःसर्वभावन
वः।।हरश्चहरिणाक्षश्चसर्वभूतहरप्रभुः।।२।।प्रवृत्तिश्चनिवृत्तिश्चनियतःशाश्वतोध्रुवः।।
श्मशानवासीभगवान्खचरोगोचरोर्दनः।।३।।अभिवाद्योमहाकर्मातपस्वीभूतभावनः।।उन्म
त्तवेषप्रच्छन्नःसर्वलोकप्रजापतिः।।४।।महारूपोमहाकायोवृषरूपोमहायशाः।।महात्मास
र्वभूतात्माविश्वरूपोमहाहनुः।।५।।लोकपालोंतर्हितात्माप्रसादोहयगर्दभिः।।पवित्रश्च
महांश्चैवनियमोनियमाश्रितः।।६।।सर्वकर्मास्वयंभूश्चआदिरादिकरोनिधिः।।सहस्राक्षोवि
रूपाक्षःसोमोनक्षत्रसाधकः।।७।।सूर्यचंद्रगतिःकेतुःग्रहोग्रहपतिर्वरः।।अद्रिरद्र्यालयःक
र्त्तामृगबाणार्पणोनघः।।८।।महातपादीर्घतपाअदीनोदीनसाधनः।।संवत्सरकरोमंत्रःप्र
माणंपरमंतपः।।९।।योगीयोज्योमहाबीजोमहारेतामहातपाः।।सुवर्णरेताःसर्वज्ञःसुबी
जोवृषवाहनः।।१०।।दशबाहुस्त्वनिमिषोनीलकंठउमापतिः।।बहुरूपःस्वयंश्रेष्ठोबलिवैरो

© Dharmartha Trust J&K. Digitized by eGangotri

चनोगणः॥२१॥गणकर्त्तागणपतिर्दिग्वासाःकामएवच॥मंत्रवित्परमोमंत्रःसर्वभावकरोह
रः॥२२॥कमंडलुधरोधन्वीबाणहस्तःकपालवान्॥अशिनीशतघ्नीखंडीपट्टिशीचायुधीम
हान्॥२३॥स्रुविहस्तःसुरूपश्चतेजस्तेजस्करोनिधिः॥उष्णीषीचसुवक्त्रश्चउदग्रोविनयस्तथा॥
२४॥दीर्घश्चहरिनेत्रश्चसुतीर्थकृष्णएवच॥सृंगालरूपःसर्वार्थोमुंडःसर्वकमंडलुः॥२५॥
अजश्चमृगरूपश्चगंधचारीकपर्द्यपि॥ऊर्ध्वरेताऊर्ध्वलिंगऊर्ध्वशायीनभस्तलः॥२६॥
त्रिजटश्चीरवासीचरुद्रसेनापतिर्विभुः॥नक्तंचरोऽतितिग्मश्चअहश्चारीसुवर्चसः॥२७॥
2 गजहादैत्यहाचैवलोकधातागुणाकरः॥सिंहशार्दूलरूपश्चआर्द्रचर्मांबरोवरः॥२८॥का
लयोगीमहानादःसर्ववासाश्चतुष्पथः॥निशाचरप्रेतचारीभूतचारीमहेश्वरः॥२९॥ २
बहुरूपोबहुधनःसर्वाधारोमनोगतिः॥नृत्यप्रियोनृत्यरतोनृत्यकःसर्वलालसः॥३०॥
घोषोमहानपाईशोनित्योगिरिचरोनभः॥सहस्रहस्तोविजयोव्यवसायोह्यनिंदितः॥३१॥

© Dharmartha Trust J&K. Digitized by eGangotri

=समर्षणोमहामर्षीयज्ञकामोमनोमयः॥दक्षयज्ञापहारीचसुखदोमध्यमस्तथा॥२२॥ते
जोपहारीबलहामुदितोप्यजितोभव॥गंभीरघोषीगंभीरोगंभीरबलवाहनः॥२३॥न्यग्रो
धरूपोन्यग्रोधोवृक्षकर्णस्थितिर्विभुः॥तीक्ष्णबाहुश्चहर्षश्चसहायःसर्वकालवित्॥२४॥वि
ष्णुःप्रसादितोयज्ञःसमुद्रोवडवामुखः॥हुताशनसहायश्चप्रशांतात्माहुताशनः॥२५॥उग्र
तेजोमहातेजोजयोविजयकालवित्॥ज्योतिषामयनंसिद्धिःसंधिर्विग्रहएवच॥२६॥शिखी
दंडीजटीज्वालीमूर्तिजोदुर्धरोबली॥वेणवीपणवीतालीकालःकालकटंकटः॥२७॥नक्ष
त्रविग्रहविधिर्गुणवृद्धिलयोगमः॥प्रजापतिर्दिशांबाहुर्विभागःसर्वतोमुखः॥२८॥वै
रोचनोसुरगणोहिरण्यकवचोद्भवः॥अप्रज्योबालचारीचमहाचारीस्तुतस्तथा॥२९॥
सर्वतुर्यनिनादीचसर्ववाद्यपरिग्रहः॥व्यालरूपोबिलावासीहेममालीतरंगवित्॥३०॥
त्रिदशस्त्रिदशावासोसर्वबंधविमोचनः॥बंधनस्त्वसुरेंद्राणांयुधिशत्रुविनाशनः॥३१॥

© Dharmartha Trust J&K. Digitized by eGangotri

साक्षात्प्रसादोदुर्गासः सर्वसाधुनिषेवितः ॥ प्रस्कंदनोविभागश्च अतुल्योयज्ञभागवित्
॥३२॥ सर्वचारीसर्ववासोदुर्वासावाङ्मनोभवः ॥ हेमोहेमकरोयज्ञः सर्ववीरोनरोत्तमः ॥३३॥ लो
हिताक्षोमहाक्षश्चविजयाख्योविशारदः ॥ सङ्ग्रहोविग्रहाकर्त्तामोक्षः सर्वनिवासनः ॥३४॥
मुख्योमुक्तश्चदेहश्चदेहार्थः सर्वकामदः ॥ सर्वकालप्रसादश्चसुबलोबलरूपधृक् ॥३५॥
आकाशनिधिरूपश्चनिपादीउरगः खगः ॥ रौद्ररूपीपांसुरादिः वसुरश्मिः सुवर्चसी ॥३६॥
वसुवेगोमहावेगोमहायक्षोनिशाकरः ॥ सर्वभावाश्रियावासीउपदेशकरोहरः ॥३७॥ मनुरा
त्मापतिर्लोकीसंभोज्यश्चसहस्त्रदः ॥ पक्षीचपक्षिरूपीचअतिदीप्तोविशांपतिः ॥३८॥ उन्मा
दोमदनः कामोह्यश्वत्थोऽर्थकरोयशः ॥ वामदेवश्चरामश्चप्राग्दक्षिणश्चवासनः ॥३९॥ सि ३
द्धयोगीमहर्षिश्चसिद्धार्थः सिद्धसाधकः ॥ भिक्षुश्चभिक्षुरूपश्चविपणोमृदुरव्ययः ॥४०॥
महासेनोविशाखश्चषष्टिभागोगवांपतिः ॥ वज्रहस्तश्चविष्कंभीचमूस्तंभनएवच ॥४१॥

© Dharmartha Trust J&K. Digitized by eGangotri

रक्तोरक्तकरस्थाणुर्मधुर्मधुकरोचनः॥वाचस्पत्योवाजसनोनित्यमाश्रमपूजितः॥४२॥ब्र
ह्मचारीलोकचारीसर्वचारीविचारवित्॥ईशानईश्वरःकालोनिशाचारीपिनाकधृक्॥४३॥नि
मित्तस्थोनिमित्तश्चनंदिर्नंदिकरोहरिः॥नंदीश्वरश्चनंदीचनंदिनोनंदिवर्द्धनः॥४४॥भगहारी
निहंताचकालोब्रह्मपितामहः॥चतुर्मुखोमहालिंगश्चतुर्लिंगस्तथैवच॥४५॥लिंगाध्यक्षः
सुराध्यक्षोयोगाध्यक्षोयुगावहः॥बीजाध्यक्षोबीजकर्ताऽध्यात्मानुगतोबलः॥४६॥इतिहासः
सकल्पश्चगौतमोथनिशाकरः॥दंभोह्यदंभोवैदंभोवश्योवश्यकरःकलिः॥४७॥लोककर्ताप
शुपतिर्महाकर्ताह्यनौषधः॥अक्षरंपरमंब्रह्मबलवान्छक्रएवच॥४८॥नीतिर्ह्यनीतिःशुद्धा
त्माशुद्धोमान्योगतागतिः॥बहुप्रसादःसुस्वप्नोदर्पणोऽथत्वमित्रजित्॥४९॥वेदकारोमंत्रकारो
विद्वान्समरमर्द्दनः॥महामेघनिवासीचमहाघोरोवशीकरः॥५०॥अग्निज्वालोमहाज्वालोऽप्रति
धूम्रोहुतोहविः॥वृषभःशंकरोनित्योवर्चस्वीधूम्रलोचनः॥५१॥नीलस्तथांगलुब्धश्चशोभ

© Dharmartha Trust J&K. Digitized by eGangotri

नोनिरवयहः॥ स्वस्तिदः स्वस्तिभावश्च भोगी भोगकरोलघुः॥५२॥ उत्संगश्च महांगश्च महाग
र्भपरायणः॥ कृष्णवर्णः सुवर्णश्चइंद्रियं सर्वदेहिनां॥५३॥ महापादोमहाहस्तोमहाकायो
महायशाः॥ महामूर्द्धामहामात्रोमहानेत्रोनिशालयः॥५४॥ महांतकोमहाकर्णोमहोष्ठश्च
महाहनुः॥ महानासोमहाकंबुर्महाग्रीवः श्मशानभाक्॥५५॥ महावक्ष्योमहोरस्कोह्यंतरा
त्मामृगालयः॥ लंबनोलंबितोष्ठश्च महामायः पयोनिधिः॥५६॥ महादंतोमहादंष्ट्रोमहाजि
ह्वोमहामुखः॥ महानखोमहारोमामहाकेशोमहाजटः॥५७॥ प्रसन्नश्चप्रसादश्चप्रत्ययोगि
रिसाधनः॥ स्नेहनोस्नेहनश्चैव अजितश्चमहामुनिः॥५८॥ वृक्षकारोवृक्षकेतुरनलोवायु
वाहनः॥ मंडलीमेरुधामोचदेवाधिपतिरेवच॥५९॥ अथर्वशीर्षः सामास्यः ऋक्सहस्त्र

मितेक्षणः॥ यजुःपादभुजोगुह्यः प्रकाशोजंगमस्तथा॥६०॥ अमोघार्थप्रसादश्च अभिगम्यः
सुदर्शनः॥ उपकारः प्रियः शर्वः कनकः कांचनच्छविः॥६१॥ नाभिर्नंदिकरोभावः पुष्करस्थप

© Dharmartha Trust J&K. Digitized by eGangotri

तिस्थिरः॥ द्वादशास्त्रसनश्चाद्योयज्ञोयज्ञसमाहितः॥६२॥ नक्तंकलिश्चकालश्चमकरःकाल
पूजितः॥ सगणोगणकारश्चभूतवाहनसारथिः॥६३॥ भस्मशायीभस्मगोप्ताभस्मभूतस्तमो
गुणः॥ लोकपालस्तथालोकोमहात्मासर्वपूजितः॥६४॥ शुक्लस्त्रिशुक्लसंपन्नःशुचिर्भूतनिषेवि
तः॥ आश्रमस्थःक्रियावस्थोविश्वकर्ममतिर्वरः॥६५॥ विशालशाखस्ताम्रोष्ठोह्यंबुजालःसुनि
श्चलः॥ कपिलःकपिलःशुक्लःआयुश्चैवपरोवरः॥६६॥ गंधर्वोह्यदितिस्तार्क्ष्यःसुविज्ञेयः
सुशारदः॥ परश्वधायुधोदेवःअंधकारीसुबांधवः॥६७॥ तुंबवीणोमहाक्रोधऊर्ध्वरेताज
लेशयः॥ उग्रोवंशकरोवंशोवंशनादोह्यनिंदितः॥६८॥ सर्वांगरूपोमायावीसुहृदोह्यनि
लोनलः॥ बंधनोबंधकर्ताचसुबंधुरविमोचनः॥६९॥ सयज्ञारिःसुकामारिर्महादंष्ट्रोम
हायुधः॥ बहुधानिंदितःशर्वःशंकरःशंकरोवरः॥७०॥ अमरेशोमहादेवोविश्वदेवःसु
रारिहा॥ निःसंगश्चाहिर्बुध्न्यश्चचेकितानोहरिस्तथा॥७१॥ अजैकपाच्चकापालीत्रिशं

© Dharmartha Trust J&K. Digitized by eGangotri

कुरजित: शिव:॥धन्वंतरिर्धूमकेतु: स्कंदो वैश्रवणस्तथा॥७२॥धाता शक्रश्च विष्णुश्च मि
त्रस्त्वष्टा ध्रुवो धर:॥प्रभाव: सर्वगो वायुरर्यमा सविता रवि:॥७३॥उग्रदंष्ट्रो विधाता च मांधाता भू
तभावन:॥रतिस्तीर्थश्च वाग्मी च सर्वकर्मगुणावह:॥७४॥पद्मवक्त्रो महावक्त्रश्चंद्रवक्त्रो म
नोरम:॥बलवांश्चोपशांतश्च पुराण: पुण्यवर्चस:॥७५॥कुरुकर्ता कालरूपी कुरुभूतो महे
श्वर:॥सर्वाशयो दर्भशायी सर्वेषां प्राणिनां पति:॥७६॥देवदेवसुखासक्त: सदसत्सर्वरत्नवि
त्॥कैलासशिखरोवासी हिमवद्गिरिसंश्रय:॥७७॥कूलहारी कूलकर्ता बहुबीजो बहुप्रद:॥व
णिजो वर्द्धनो वृक्षो बकुलश्चंदनश्छद:॥७८॥सारग्रीवो महाजंतुरनकश्च महौषधि:॥सिद्धा
र्थकारी सिद्धार्थश्छंदो व्याकरणानि च॥७९॥सिंहनाद: सिंहदंष्ट्र: सिंहग: सिंहवाहन:॥प्रभावा ५
त्मा जगत्कालस्थालो लोकहितस्तरु:॥८०॥सारंगो सुखवक्त्रो — — तुमाली स्वभावन:॥भूताल
यो भूतपतिरहोरात्रमनिंदित:॥८१॥आसन: सर्वभूतानां निलयश्च विभुर्भव:॥अमोघ: सं

© Dharmartha Trust J&K. Digitized by eGangotri

यतोह्यध्वोयोजनःप्राणहारकः॥८२॥धृतिमान्मतिमान्दक्षःसत्कृतश्चयुगाधिपः॥गोपालोगोपति
र्ग्रामोगोचर्मवसनोहरः॥८३॥हिरण्यबाहुश्चतथागुह्यकालप्रवेशकः॥प्रतिष्ठायांमहाहर्षोजित
कामोजितेंद्रियः॥८४॥गांधारश्चसुरालश्चतपःकर्मरतिर्धन॥महागीतोमहाब्रह्माह्यप्सरोग
णसेवितः॥८५॥महाकेतुंकर्मधातानेकतानश्चराचरः॥आवेदनीयोआवेशःसर्वगंधसुखा
वहः॥८६॥तोरणस्तरणोवायुःपरिधावतिचैकतः॥संयोगोवर्द्धनोवृद्धोमहावृद्धोगणाधिपः॥८७॥
नित्योधर्मसहायश्चदेवासुरपतिःपतिः॥अमुक्तामुक्तबाहुश्चद्विविधश्चसुपर्वणः॥८८॥आ
षाढश्चसुषाढश्चध्रुवोहरिहयोहरिः॥वसुरावर्त्तमानित्योवसुश्रेष्ठोमहामदः॥८९॥शिरोहा
रीचवर्षश्चसर्वलक्षणभूषितः॥अक्षरश्चाक्षयोयोगीसर्वयोगीमहाबलः॥९०॥समाम्नायो
समाम्नायःस्तीर्थदेवोमहाकृतिः॥निर्जीवोजीवनोमंत्रोअनिंद्योबहुकर्कशः॥९१॥रक्तप्रभूतो
रक्तांगोमहार्णवनिनादधृक्॥मूलोविशाखोह्यमृतोव्यक्तोव्यक्तःसनातनः॥९२॥आरोहणो

© Dharmartha Trust J&K. Digitized by eGangotri

निरोहस्त्ववीरोलहरीमहातपाः॥सेनाकल्पोमहाकल्पोयुगोयुगकरोहरिः॥९३॥युगरूपोमहारूपो
पवनोगहनोनगः॥न्यायनिर्वापणोनादःपंडितोह्यचलोपमः॥९४॥बहुमालोमहामालःसुमा
लोबहुलोचनः॥विस्तारोलवणःकूरःऋतुमासफलोदयः॥९५॥वृषभोवृषभांगांगोमणिबं
धुर्जटाधरः॥इंद्रोविसर्गःसुमुखःसुरःसर्वायुधःसहः॥९६॥निवेशनःसुधन्वाचयुगगंधो
महाहनुः॥गंधमालीचभगवानुत्थानसर्वकर्मणां॥९७॥आत्मानोबहुलोबाहुःसकलःसर्वलो
6 चनः॥उदस्तालीकरस्तालीऊर्द्धसंहतलोचनः॥९८॥छत्रपद्मःसुविख्यातःसर्वलोकाश्रयोम
हान्॥मुंडोविरूपोबहुलोदंडिमुंडोविकुंडलः॥९९॥हर्यक्षःककुभोवज्रीदीप्तावर्चःसहस्रपात्॥
सहस्रमूर्द्धादेवेंद्रःसर्वन्तमयोहरिः॥१००॥सहस्रबाहुःसर्वांगःशरण्यःसर्वकर्मकृत्॥पवि ६
त्रंस्निग्धयुर्मंत्रःकनिष्टःकृष्णपिंगलः॥१०१॥ब्रह्मदंडविनिवर्तःशरघ्नःशरतापधृक्॥प
द्मगर्भोमहागर्भोपद्मगर्भोजलोद्भवः॥१०२॥गभस्तिर्ब्रह्मकृद्ब्रह्मब्रह्मविद्ब्राह्मणोगतिः॥

© Dharmartha Trust J&K. Digitized by eGangotri

अनंतरूपोनैकात्मातिग्मतेजाह्यसंभव॥२०३॥ऊर्ध्वगात्मापशुपतिर्वातिरंहोमनोजव॥
चंदनीपद्ममालीचस्वगुणोत्तरगोत्तर॥२०४॥कर्णिकारोमहास्रग्वीनीलमौलीपिनाकधृ
क्॥उमापतिरुमाकांतोजाह्नवीधृदयंगम॥२०५॥वीरोवराहोवरदोवरेशस्त्वमहामना॥म
हाप्रसादस्त्वनघःशत्रुहाश्वेतपिंगल॥२०६॥प्रीतात्माप्रीयतात्माचसंयतात्माप्रधानधृक्
सर्वपार्श्वस्तुतस्तार्क्ष्योधर्मसाधारणोवर॥२०७॥चराचरात्मासूक्ष्मात्मागोवृषोगोवृषेश्वर॥
साध्यर्षिर्वसुरादित्योविवस्वान्सवितामृग॥२०८॥व्यासःसर्वस्यसंक्षेपोविस्तारःपर्ययोनय॥
ऋतुःसंवत्सरोमासःपक्षःसंख्यायनानय॥२०९॥कलाकाष्ठालवोमात्रामुहूर्ताहःक्षपाक्षण॥
विश्वःक्षेत्रंप्रजाबीजंलिंगमाद्यस्त्वनंदित॥२१०॥सदसद्व्यक्तमव्यक्तंपितामातापितामह॥
स्वर्गद्वारंप्रजाद्वारंमोक्षद्वारंत्रिविष्टपं॥२११॥निर्वाणंज्ञानदंचैवब्रह्मलोकपरागति॥देवासुर
नमस्कृत॥
गुरुर्देवोदेवासुरसन्नोंम्प्रय॥देवासुरगणाध्यक्षोदेवासुरगणायन॥२१३॥देवासुरेश्वरो
॥२१४॥देवासुरमहामात्रोदेवासुरगणाश्रय॥

© Dharmartha Trust J&K. Digitized by eGangotri

देवोदेवासुरमहेश्वरः॥ सर्वदेवमयोचिंत्योदेवानामात्मसंभवः॥१४॥ उद्भिज्जस्त्रिक्रमोवैद्यो
विराजोवरदोवरः॥ ईज्योहस्तिमुखोव्याघ्रोदेवसिंहोनरर्षभः॥१५॥ विबुधोग्रवरः श्रेष्ठोसर्वदे
वोत्तमोत्तमः॥ गुरुः कांतोनिजः सर्वपवित्रः सर्ववाहनः॥१६॥ प्रयुक्तः शोभनोवज्रः ईशानः
प्रभुरव्ययः॥ शृंगीशृंगप्रियोबभ्रुराजराजोनिरामयः॥१७॥ अभिरामः सुरगणोविरा
मः सर्वसाधनः॥ ललाटाक्षोविश्वदेहोहरिणोब्रह्मवर्चसः॥१८॥ स्थावराणांपतिश्चैवनिय
7 मेंद्रियवर्धनः॥ सिद्धार्थः सर्वसिद्धार्थोनित्यः सत्यव्रतः शुचिः॥१९॥ व्रतादिर्यत्परंब्रह्म
मुक्तानांपरमागतिः॥ विमुक्तोदीर्घतेजाश्चश्रीमान्श्रीवर्द्धनोजगत्॥२०॥ यथाप्रसादोभग
वानितिभक्त्यास्तुतोमया॥ मंत्रब्रह्मादयोदेवाविदुर्यन्नमहर्षयः॥२१॥ तंस्तवाम्यहमाद्यंचक ७
स्तोष्यतिजगत्प्रभुं॥ भक्तिश्चैवपुरस्कृत्य मयायज्ञपतिर्विभुः॥२२॥ ततोनुज्ञांसंप्राप्य कृत्स्त
तोनमंतिमत्तांगतिः॥ शिवमेवंस्तुतोदेवैर्नामभिः पुष्टिवर्द्धनेः॥२३॥ नित्ययुक्तः शुचिर्भूत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

प्राप्नोत्य त्यात्मानमात्मन ॥ एतद्धि परमं ब्रह्म स्वयंगीतं स्वयंभुवा ॥ २४ ॥ स्तूयमानश्चैव देवाश्च स्त
वं त्येतेन तत्परं ॥ स्तूयमानो महादेवः प्रीयते चात्मनामभिः ॥ २५ ॥ भक्तानुकंपी भगवान्ना
त्मसंस्थां करोति तान् ॥ तथैव च मनुष्येषु यत्रामुत्र प्रधानतः ॥ २६ ॥ आस्तिकोश्रद्दधानश्च ब
हुभिर्जन्मभिः स्तवैः ॥ जाग्रतोथ स्वयं तं च व्रजंतो गतिसंस्थितः ॥ २७ ॥ स्तुवंति स्तूयमानेच
चनुष्य थिरमंतिच ॥ जन्मकोटिसहस्रेषु नानासंसारयोनिषु ॥ २८ ॥ जंतोर्विशुद्धयाय स्य भ
वे भक्तिः प्रजायते ॥ उत्पन्ना च भवे भक्तिरनन्या सर्वभावनः ॥ २९ ॥ एतद्देवेषु दुःप्राप्यं मानुष्ये
च न लभ्यते ॥ निर्विघ्ना निश्चला भद्रे भक्तिरव्यभिचारिणी ॥ ३० ॥ तस्यैव च प्रसादेन भक्तिरु
त्पद्यते नृणां ॥ प्रयायाति परां सिद्धिं तद्भागवतमानसः ॥ ३१ ॥ ये सर्वभावानुगताः प्रपद्यंते म
हेश्वरं ॥ प्रसन्नवत्सलो देव संसारात्तान् समुद्धरेत् ॥ ३२ ॥ एवमन्ये पि कुर्वंति देवाः संसारमोच
ने ॥ मनुष्याणां महादेवादन्यत्रापि तयो बलात् ॥ ३३ ॥ इति तेनेंद्रकल्पेन भगवान्सदसत्पतिः ॥

© Dharmartha Trust J&K. Digitized by eGangotri

कृत्तिवासास्कृतं पूर्वं तं डिताम्शुद्धबुद्धिना ॥३४॥ स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ॥ ब्रह्मा
३५॥
प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे ॥ मृत्युः प्रोवाच रुद्रेभ्यो रुद्रेभ्यस्तं डिमागमत् ॥ महता त
पसा प्राप्तं तं डिना ब्रह्मसद्मनि ॥३६॥ तं डिः प्रोवाच शुक्राय गौतमायाह भार्गवः ॥ वैवस्वताय म
नवे गौतमः प्राह साधवे ॥३७॥ नारायणाय साध्याय मनुरिष्टाय धीमते ॥ यमाय प्राह भगवा
न्साध्यो नारायणोऽच्युतः ॥३८॥ नाचिकेताय भगवानाह वैवस्वतो यमः ॥ मार्कंडेयाय वार्ष्णे
य नाचिकेतोऽभ्यभाषत ॥३९॥ मार्कंडेयात्मया प्राप्तो नियमेन जनार्दन ॥ तवाप्यहममित्रघ्न
8 स्तवं दद्यद्यविश्रुतं ॥४०॥ स्वर्ग्यमारोग्यमायुष्यं धन्यं वेदेन संमितं ॥ नास्य विघ्नानि कुर्वंति दा
नवा यक्षराक्षसाः ॥४१॥ पिशाचा यातुधाना वा गुह्यका भुजगा अपि ॥ यः पठेत्प्रयतः प्रातः ब्रह्म ८
चारी जितेंद्रियः ॥४२॥ अभिन्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत् ॥४३॥ इत्याकाशभैरवतंत्र
कल्पे हरिहरब्रह्मविरचितेशरभसहस्रनामस्तोत्रं संपूर्णं ॥ ॥ श्रीशरभेश्वरार्पणमस्तु ॥

© Dharmartha Trust J&K. Digitized by eGangotri

॥स्वस्तीश्री संवत् १८४८ वर्षे फाल्गुन मासे शुक्लपक्षे प्रतिपत्तिथौ गुरुवारेण॥ लिखि
तं वाराणस्यां॥ त्रि॰ प्रभुदत्त॥ त्रि॰ जयशंकर वि॰ सविता दत्तस्वयं पठनार्थं शुभं भवतु।

© Dharmartha Trust J&K. Digitized by eGangotri

[illegible]

© Dharmartha Trust J&K. Digitized by eGangotri